# श्रीहरिनामामृतव्याकरणम् : व्याकरणज्ञानपुरःसरमिष्टोपासना
## Śrīharināmāmṛtavyākaraṇam : vyākaraṇajñānapuraḥsaramiṣṭopāsanā

**Chiranjit Kole**
Assistant Professor, Dept. of Sanskrit
Ananda Chandra College
Jalpaiguri, West Bengal, India
Email: kole.chiranjit@gmail.com

**Abstract:** क्रैस्तीयषोडशशतकस्य महाप्रभुश्रीगौराङ्गप्रतिष्ठितवैष्णवसम्प्रदायस्य श्रीजीवगोस्वामिप्रणीतं श्रीहरिनामामृतव्याकरणं ग्रन्थमणित्वं भजते। अयं व्याकरणग्रन्थः कृष्णभक्तिरसामृताभिसेचनस्य निदर्शनमावहति। इदं व्याकरणं न केवलं संस्कृतभाषायाः व्याकरणमपि तु वैष्णवानां वैष्णवेतरेषाञ्च वा कृते आध्यात्मिकमार्गप्रदर्शकम्, यत्र हरिनाममयेन सूत्रपाठेन इष्टलाभस्य सोपानमुन्मोचितमस्ति। पाणिनीयव्याकरणं कलापव्याकरणञ्चांशिकरूपेणानुसृत्य इदं श्रीहरिनामामृतव्याकरणं विरचितम्। इह पाणिनीयप्रत्याहाराः अगृहीताः, किन्तु कलापव्याकरणस्य सिद्धवर्णपाठः हरिनामसम्बलितसूत्रसमूहेषु अनुसृतः। पाणिनीयव्याकरणादिषु आरभ्य क्रैस्तीयचतुर्दशशतकपर्यन्तं विरचितेष्वपाणिनीयव्याकरणादिषु या व्याख्यानशैली परिदृष्टा, ततः अतिशयप्राञ्जलव्याख्यानरीतिः श्रीहरिनामामृतव्याकरणे वर्तते। अस्मिन् व्याकरणग्रन्थे सूत्राणामाक्षरिकसंक्षेपणाय वैयाकरणानां मात्रालाघवं तिरस्कृतमस्ति। व्याकरणे अस्मिन् महेश्वराद्ब्रह्मणो वा वर्णानामुत्पत्तिरित्यप्रदर्श्य, नारायणादेव वर्णानामुत्पत्तिर्जाता इति कथनेन सूत्रालोचनमारब्धमिति। वैष्णवानां ग्रन्थमणिस्वरूपमिदं श्रीहरिनामामृतव्याकरणमेवाश्रित्य मयायं प्रबन्धः प्रस्तूयते।

श्रीजीवगोस्वामिप्रणीतश्रीहरिनामामृतव्याकरणस्थेन हरिनाममयसूत्रपाठेन वैष्णवानामिष्टोपासनं कथं भवेत्कथं वा संस्कृतव्याकरणस्यापि सम्यक्तया ज्ञानं भवेदिति प्रदर्शनमेव प्रबन्धस्यास्य मूलं लक्ष्यम्। एवं प्रबन्धे अस्मिन् श्रीहरिनामामृतव्याकरणे आलोचितानां केषाञ्चन हरिनामसम्बलितानां सूत्राणां संक्षेपव्याख्यानेन तेषु सूत्रेषु प्रयुक्तानां हरिनामसम्बन्धीनां संज्ञावाचकशब्दानां हरिनामत्वं कथं सम्भवतीति तत्प्रदर्श्य तेन हरिनामसम्बलितसूत्रपाठेन कथं वैष्णवानां हरिनामसंकीर्तनं किञ्च संस्कृतव्याकरणस्य सम्यक्तयाध्ययनं भवतीति प्रस्तूयते।

**Keywords:** सर्वेश्वरः, वामनः, पुरुषोत्तमः, लक्ष्मीः, कारकम्, कर्तृ, कृष्णपुरुषः, रामकृष्णः, अव्ययीभावः।

**भूमिका—**

क्रैस्तीये षोडशशतके महाप्रभुश्रीगौराङ्गप्रतिष्ठिते वैष्णवसम्प्रदाये श्रीजीवगोस्वामिप्रणीतं श्रीहरिनामामृतव्याकरणं ग्रन्थमणित्वं भजते। अयं व्याकरणग्रन्थः कृष्णभक्तिरसामृताभिसेचनस्य निदर्शनमावहति। इदं व्याकरणं न केवलं संस्कृतभाषायाः व्याकरणमपि तु वैष्णवानां व्याकरणज्ञानलाभेच्छुकानाञ्च वा कृते आध्यात्मिकमार्गप्रदर्शकम्, यत्र हरिनाममयेन सूत्रपाठेन इष्टलाभस्य सोपानमुन्मोचितं भवति। पाणिनीयव्याकरणं कलापव्याकरणञ्चांशिकरूपेणानुसृत्य इदं श्रीहरिनामामृतव्याकरणं विरचितम्। इह पाणिनीयप्रत्याहाराः अगृहीताः, किन्तु कलापव्याकरणस्य सिद्धवर्णपाठः हरिनामसम्बलिसूत्रसमूहेषु अनुसृतः। पाणिनीयव्याकरणादिषु आरभ्य क्रैस्तीयचतुर्दशशतकपर्यन्तं विरचितेष्वपाणिनीयव्याकरणादिषु या व्याख्यानशैली परिदृष्टा, ततः अतिशयप्राञ्जलव्याख्यानरीतिः श्रीहरिनामामृतव्याकरणे वर्तते। अस्मिन् व्याकरणग्रन्थे सूत्राणामाक्षरिकसंक्षेपणाय वैयाकरणानां मात्रालाघवं तिरस्कृतमस्ति। व्याकरणे अस्मिन् महेश्वराद्ब्रह्मणो वा वर्णानामुत्पत्तिरप्रदर्श्य, नारायणादेव वर्णानामुत्पत्तिर्जाता इति कथनेन सूत्रालोचनमारब्धमिति। वैष्णवानां ग्रन्थमणिस्वरूपमिदं श्रीहरिनामामृतव्याकरणमेवाश्रित्य मयायं प्रबन्धः प्रस्तूयते।

श्रीजीवगोस्वामिप्रणीतश्रीहरिनामामृतव्याकरणस्थेन हरिनाममयसूत्रपाठेन वैष्णवानामिष्टो-पासनं कथं भवेत्कथं वा संस्कृतव्याकरणस्यापि सम्यक्तया ज्ञानं भवेदिति प्रदर्शनमेव प्रबन्धस्यास्य मूलं लक्ष्यम्। एवं प्रबन्धे अस्मिन् श्रीहरिनामामृतव्याकरणे आलोचितानां केषाञ्चन हरिनामसम्बलितानां सूत्राणां संक्षेपव्याख्यानेन तेषु सूत्रेषु प्रयुक्तानां हरिनामसम्बन्धीनां शब्दानां हरिनामत्वं कथं सम्भवतीति तत्प्रदर्श्य तेन हरिनामसम्बलितसूत्रपाठेन कथं वैष्णवानां हरिनामसंकीर्तनं किञ्च संस्कृतव्याकरणस्य सम्यक्तयाध्ययनं भवतीति प्रस्तूयते।

प्रबन्धेऽस्मिन्क्रमशः श्रीहरिनामामृतव्याकरणस्य संज्ञाप्रकरणादारभ्य तद्धितप्रकरणं यावत्स्थितानां चितानां सर्वेश्वरः, वामनः, नाम, लक्ष्मीः, कारकम्, कर्तृ, कृष्णपुरुषः, रामकृष्णः, अव्ययीभावश्चेति नवसंज्ञानां श्रीहरिनामामृतव्याकरणे स्वरूपं किमस्ति? केन सूत्रेण विहितेयं संज्ञा? इति तस्य सूत्रस्य पदविश्लेषणपूर्वकमालोच्य ततः तस्याः संज्ञायाः विश्लेषणपूर्वकं सविमर्शात्मकमालोचनं विस्तारेण प्रस्तूयतेऽधः।

**२. सर्वेश्वरः—**

**२.१ श्रीहरिनामामृतव्याकरणे सर्वेश्वरसंज्ञास्वरूपम्—**

'नारायणादुद्भूतोऽयं वर्णक्रमः'[1] इति प्रथमसूत्रेण वर्णसमाम्नायस्य निमित्तमुल्लिख्य श्रीजीवः स्वरचिते श्रीहरिनामामृतव्याकरणे प्रथमां सर्वेश्वरसंज्ञाम् उपस्थापयति 'तत्रादौ चतुर्दश सर्वेश्वराः'(१।२) इत्यनेन। प्रस्तुतसूत्रेण 'वर्णक्रमे'[2] आदौ स्थितानां चतुर्दशवर्णानां सर्वेश्वरसंज्ञा विधीयते। षड्विधेषु सूत्रेषु संज्ञासूत्रमिदम्। अस्मिन् सूत्रे त्रीणि पदानि सन्ति। 'तत्र' इत्यव्ययपदम्, आदौ इति सप्तम्यन्तं पदं, सर्वेश्वराः इति प्रथमायाः बहुवचनान्तं पदम्। 'तत्र' इति पदेन पूर्वसूत्रात्

'वर्णक्रमः' इति पदमध्याह्रियते। सूत्रे अस्मिन् 'सर्वेश्वरः' इति संज्ञादलं, वर्णक्रमे आदौ चतुर्दशवर्णाः इति संज्ञिदलम्। तेन च सूत्रार्थः भवति– वर्णक्रमे आदौ चतुर्दशवर्णाः सर्वेश्वरसंज्ञकाः भवन्ति इति। गोस्वामिपादेन सूत्रस्य वृत्तौ लिखितम्– 'तस्मिन् वर्णक्रमे आदौ चतुर्दशवर्णाः सर्वेश्वरनामानो भवन्ति– अ आ इ ई उ ऊ ऋ ॠ ऌ ॡ ए ऐ ओ औ। एते स्वराः अचः च प्राचीनानाम्। एते स्वतन्त्रोच्चारणाः। कादीनामुच्चारणञ्चैषामधीनमिति सर्वेश्वराः' इति।

**२.२ सर्वेश्वरसंज्ञाविमर्शः—**

सर्वेषामीश्वरः सर्वेश्वरः इति षष्ठीतत्पुरुषसमासनिष्पन्नेन शब्देन भगवान्श्रीकृष्णः उच्यते। कथञ्चेद्भगवान् श्रीकृष्णः परब्रह्मस्वरूपेण, जगत्कारणभूतेन, परमसत्यरूपेण च उपस्थापितः श्रीमद्भागवते। भगवतः दश अवताराः सन्ति। दश अवतारेषु भगवान् श्रीकृष्णः परब्रह्मस्वरूपेण साक्षात्तिष्ठति। यदुक्तं– "एते चांशकलाः पुंसः कृष्णस्तु भगवान् स्वयम्"[3]। इति। श्रीमद्भागवतस्य दशमस्कन्धे– "विरचिताभयं व्रजसुरक्षितं तव विभो गोवर्धनधरोऽसि नः शरणम्"[4]। गोवर्धनगिरि भगवान् एकेन हस्तेन धृतवान्निति प्रतिपादितमस्ति। अनेन च भगवतः जगदाधारत्वं सूच्यते। यश्च जगदाधारः स सर्वेश्वरः इति वक्तुं शक्यते एव। विश्वरूपेण भगवान् सर्वत्र व्यापृतः अस्ति। श्रीमद्भगवद्गीतायां भगवतः श्रीकृष्णस्य सर्वव्यापित्वं वर्णितमस्ति तद्यथा– "अहं सर्वस्य प्रभवो मत्तः सर्वं प्रवर्तते"[5]। पुनः गीतायां श्रीकृष्णः अर्जुनं प्रत्युक्तवान् यत्सर्वेषां भूतानामन्तर्हृदि स्थितः प्रत्यगात्मा नित्यं ध्येयः अस्ति[6]। एवं प्रकारेण भारतीयधर्मशास्त्रेषु भगवतः श्रीकृष्णस्य सर्वेश्वरत्वं प्रतिपादितमस्ति।

एते अ आ इ ई उ ऊ ऋ ॠ ऌ ॡ ए ऐ ओ औ चतुर्दशस्वरवर्णाः स्वतन्त्राः। इह स्वतन्त्रशब्दस्य निरपेक्ष्यमित्यर्थः। कादीनामुच्चारणं येषामधीनं ते स्वतन्त्रोच्चारणाः। एते स्वतन्त्रोच्चारणाः वर्णाः सर्वेश्वरसंज्ञकाः[7] भवन्ति। कादिवर्णानामुच्चारणं स्वराधीनत्वादेषां वर्णानां सर्वेश्वर इति भगवन्नामत्वं प्रतिपाद्यते। यथा कादीनामुच्चारणमेषामधीनं तथा अनुस्वारविसर्गादेः स्थितिरपि एषामधीना। वैयाकरणसिद्धान्तकौमुद्यां श्रीमद्भट्टोजिदीक्षितेनापि माहेश्वरसूत्राणां वर्णनानन्तरं प्रोक्तं यत्– "हकारादिष्वकारः उच्चारणार्थः"। अनेन वाक्येन पुष्टं भवति यत् एषां स्वरवर्णानामभावेन हकारादीनां व्यञ्जनवर्णानामुच्चारणमसम्भवमिति। एवं भाषायां शब्दगठनप्रक्रियायामेषां चतुर्दशस्वरवर्णानां महद्गुरुत्वमस्तीति। अतः भगवान् यथा सूत्रे मणिगणा इव दशावतारेषु स्थितत्वात् सर्वेश्वरः इत्युच्यते, तद्वत् एते चतुर्दशस्वरवर्णाः अपि व्यञ्जनवर्णानामुच्चारणसहायकत्वात्सर्वेश्वराः इति निश्चप्रचं वक्तुं शक्यते। एवं प्रकारेण चतुर्दशस्वरवर्णानां सर्वेश्वरसंज्ञाकरणेन भगवन्नामस्मरणपूर्वकं व्याकरणस्याध्ययनरूपं यदुद्देश्यं तत्सम्यक्तया प्रतिपादितमस्ति ग्रन्थकारेण।

**३.वामनः—**

**३.१ श्रीहरिनामामृतव्याकरणे वामनसंज्ञाविमर्शः—**

श्रीजीवगोस्वामिविरचिते श्रीहरिनामामृतव्याकरणे संज्ञासन्धिप्रकरणे 'पूर्वो वामनः'(१।५)

पठितमिदं चतुर्थं संज्ञासूत्रमिति। महर्षिपाणिनिविरचितायाम् अष्टाध्याय्याम् 'ऊकालोऽज्झ्रस्वदीर्घप्लुतः'(१।२।२७) इत्यनेन सूत्रेण येषां वर्णानां ह्रस्वसंज्ञा विहिता, तेषामेव वर्णानामिह व्याकरणे वामनसंज्ञा विहिता। सूत्रे प्रथमायाः एकवचनान्तं पदद्वयं विद्यते। 'तेषां द्वौ द्वावेकात्मकौ'(१।४) इति पूर्वसूत्रात् 'एकात्मकौ' इति पदमनुवर्त्य षष्ठ्यन्ततया विपरिणमते। अस्मिन् सूत्रे वामनः इति संज्ञावाचकं पदम्, एकात्मकानां पूर्वो पूर्वो वर्ण इति संज्ञिवाचकम्। अतः सूत्रस्य सामान्यार्थः हि— एकात्मकसंज्ञकेषु वर्णेषु पूर्वः पूर्वो वर्णः वामनसंज्ञक इति श्रीजीवगोस्वामिपादस्याशयः। स्वग्रन्थस्य वृत्तावुक्तं– 'तेषामेकात्मकानां पूर्वपूर्वो वर्णः वामन-नामा-अ इ उ ऋ ऌ। एते ह्रस्वा निर्ह्रस्वाश्च इति। अर्थात् वर्णक्रमे एकात्मकसंज्ञकेषु आदिभागे वर्तमाना वर्णा वामनसंज्ञायुक्ताः भवन्ती'[8]ति।

**३.२ वामनसंज्ञाविमर्शः—**

नितरामेव प्रश्नः समुदेति यत् कथं श्रीहरिनामामृतव्याकरणकृता एतेषां पाणिनीयव्याकरणादिष्टाणां ह्रस्ववर्णानां वामनसंज्ञा कृता चेदुच्यते यत् श्रीहरिनामामृतव्याकरणस्य यदुद्देश्यं हरिनामस्मरणपूर्वकं व्याकरणाध्ययनं, तत्परिपूरणायैव एषां वर्णानां वैशिष्ट्यं दरीदृश्य वामनसंज्ञा कृता। वामयति इति वम-धातोः णिच्प्रत्ययपूर्वकं ल्युप्रत्यये वामनशब्दः निष्पन्नः यस्यार्थः अतिक्षुद्रः[9] इति। महाभारते वामनस्य अवतारत्वं प्रोक्तम्[10]।

भगवतः श्रीकृष्णस्य वामनावतारः सुप्रसिद्धः। भगवान् वामनः अर्थात् लघुशरीरं धारयित्वा बलेः सकाशात् त्रिपादभूमिं याचितवान्निति[11]। एवं वामनशब्दस्य भगवद्वाचकत्वं सिध्यति। अतः प्रस्तुतसूत्रे ह्रस्ववर्णैः सह भगवतः वामनावतारस्य ह्रस्वविग्रहत्वात् क्षुद्रकायत्वात् सादृश्यत्वाच्चैषां वर्णक्रमे ह्रस्ववर्णानां वामनसंज्ञाविधानं सार्थकमिति।

**४. नाम—**

**४.१ श्रीहरिनामामृतव्याकरणे नामसंज्ञास्वरूपम्—**

विष्णुभक्तिप्रकरणे संज्ञारूपेण प्रणीतं प्रथमं सूत्रम् 'अधातुविष्णुभक्तिकमर्थवन्नाम'[12] इति 'नाम'संज्ञाविधायकं सूत्रम्। अस्मिन् संज्ञासूत्रे अधातुविष्णुभक्तिकम्, अर्थवत्, नाम चेति त्रीणि पदानि सन्ति। धातवश्च विष्णुभक्तिकाश्च इत्येषां समाहारो धातुविष्णुभक्तिकमिति[13], न धातुविष्णुभक्तिकमिति अधातुविष्णुभक्तिकमिति प्रथमान्तं पदम्। अर्थः अस्य अस्तीति अर्थवत्, मतुबन्तं[14] प्रथमैकवचनान्तं पदम्। नाम इत्यपि प्रथमान्तं पदम्। विष्णुभक्तिशब्देन तदन्तं विष्णुपदञ्च लक्ष्यते। एवं धातुविष्णुभक्तिविष्णुभक्त्यन्तेभ्यः अन्यं यदर्थयुक्तं तन्नामसंज्ञं भवतीति फलितार्थः सूत्रस्य। एवञ्च सूत्रस्य वृत्तौ ग्रन्थकारेण लिखितं यत्— "भू सनन्ताद्याः धातवः। स्वादि-तिबाद्या विष्णुभक्तयः। विभक्तय इति प्राञ्चः। तान् धातून् ता विष्णुभक्तीश्च वर्जयित्वा यदर्थयुक्तं शब्दरूपं तन्नामसंज्ञं स्यात्"।

**४.२ नामसंज्ञाविमर्शः—**

नामयतीति नाम्यते अनेन वा नम-धातोः णिच्प्रत्यये बाहुलकात् डप्रत्यये नामशब्दः

निष्पद्यते। नामशब्दस्य कोशे प्राकाश्यं, सम्भावना, क्रोधः, उपगमः, कुत्सनमित्यादयः[15] पञ्च अर्थाः सन्ति। विभक्तिहीनः शब्दः अपि नाम, लिङ्गं प्रातिपदिकञ्च वा कथ्यते। इदं नाम पञ्चविधम्, तद्यथा– उणाद्यन्तं, कृदन्तं, तद्धितान्तं, समासजं, शब्दानुकरणञ्चेति[16]। ननु एवं नामशब्देन श्रीहरिनामामृतव्याकरणे पाणिनिकृतायाः प्रातिपदिकसंज्ञायाः 'नाम' इति संज्ञाकरणेन कथं श्रीजीवगोस्वामिनः हरिनामस्मरणपूर्वकं सहजतया व्याकरणस्याध्ययनरूपं यदुद्देश्यं तत्साधितमिति चेदुच्यते दाक्षिणात्याः सनातनधर्मावलम्बिनः भाले यच्चिह्नं धारयति तत् 'नाम' (  ) इत्युच्यते। वैष्णवाः ललाटे त्रिकोणविशिष्टं रेखात्रयविशिष्टञ्च यच्चिह्नं धारयति तदपि 'नाम' (  ) इत्येवोच्यते[17]। इह व्याकरणे अधातूनां, विष्णुभक्तिकानाम्, अर्थवताञ्चेति त्रयाणां यथा नाम इति संज्ञा कृता तद्वत् श्रीविष्णुभक्ताः भाले यच्चिह्नं धारयति तदपि रेखात्रयविशिष्टमिति साम्यादेवैषामधातूनां विष्णुभक्तिकानामर्थवताञ्च नामसंज्ञाकरणेन श्रीजीवगोस्वामिनः उद्देश्यं सार्थकं जातमिति।

**५ लक्ष्मीः—**

**५.१ श्रीहरिनामामृतव्याकरणे लक्ष्मीसंज्ञास्वरूपम्—**

अस्मिन् प्रकरणे संज्ञारूपेण प्रणीतं द्वितीयं सूत्रं 'नामसंज्ञश्चतुर्विधः'[18] इति। अनेन सूत्रेण पुंलिङ्गवाचकानां शब्दानां 'पुरुषोत्तमसंज्ञा' विहितेति। स्त्रीलिङ्गवाचकानां शब्दानां 'लक्ष्मी--' इति संज्ञा विहिता। नपुंसकलिङ्गानां शब्दानां 'ब्रह्म'संज्ञा विहितेति। यथोक्तं ग्रन्थकारेण सूत्रस्य वृत्तौ– स्त्रीलिङ्गो लक्ष्मी संज्ञः।

**३.५.४ लक्ष्मीसंज्ञाविमर्शः—**

नाम्नः अवस्थाभेदेन संज्ञायाः चतुर्विधत्वं वर्णयित्वा द्वितीयसंज्ञारूपेण ग्रन्थकारेण प्रोक्तं 'स्त्रीलिङ्गो लक्ष्मीसंज्ञः[19]' इति। लक्षयति पश्यति उद्योगिनमिति लक्षि इत्यतः लक्षेर्मुट् च[20] इति सूत्रेण ई-प्रत्यये मुडागमे लक्ष्मी-शब्दः निष्पद्यते, यस्य चार्थः विष्णुपत्नी, श्रीत्यादयः इति। यदुक्तममरकोषे–

ब्रह्मसूर्विश्वकेतुः स्यादनिरुद्धः उषापतिः।
लक्ष्मीः पद्मालया पद्मा कमला श्रीर्हरिप्रिया।
इन्दिरा लोकमाता मा क्षीरोदतनया रमा।
भार्गवी लोकजननी क्षीरसागरकन्यका॥ इति।

इयं लक्ष्मीदेवी स्निग्धदृष्ट्या समुदयविश्वं परिलक्षयतीत्यतः देवीनां महतीत्वात् महालक्ष्मीनाम्ना ख्यातेति। यदुक्तं– 'लक्ष्यते दृश्यते स्निग्धदृष्ट्या अनया विश्वमिति लक्ष्मीर्भगवत्स्वस्वरूपशक्तिविशेषः'[21]। अतः एवंरूपायाः गुणयुक्तायाः वा लक्ष्मीदेव्याः नाम्ना स्त्रीलिङ्गवाचकानां शब्दानां लक्ष्मीसंज्ञाकरणेन श्रीजीवगोस्वामिनः श्रीहरिनामामृतव्याकरण-प्रणयनस्य यदुद्देश्यं तत्सम्यक्तया सिद्धमिति।

**६. कारकम्—**

**६.१ श्रीहरिनामामृतव्याकरणे कारकसंज्ञास्वरूपम्—**

अस्मिन् कारकप्रकरणे प्रथमं सूत्रं "क्रियासम्बन्धविशेषि कारकम्"[22] इति कारकसंज्ञाविधायकम्। द्विपदात्मके अस्मिन् संज्ञासूत्रे क्रियायाः सम्बन्धः क्रियासम्बन्धः इति षष्ठीतत्पुरुषसमासः, स एव विशेषः इति क्रियासम्बन्धविशेषः इति कर्मधारयसमासः, क्रियासम्बन्धविषेशः अस्ति यस्य इत्यर्थे इनि-प्रत्यये कृते "क्रियासम्बन्धविशेषिन्" इति शब्दः निष्पद्यते, ततः क्लीवलिङ्गे अन्त्यनकारस्य लोपे प्रथमायामेकवचने क्रियासम्बन्धविशेषि इति पदं निष्पद्यते। "न कर्मधारयान् मत्वर्थीयो बहुव्रीहिश्चेदर्थप्रतिपत्तिकरो भवती"ति (वामनाचार्यस्य मतम्) नियमेन अस्यां पदनिष्पत्तौ आपत्तिरुदेति, इत्युक्ते क्रियासम्बन्ध एव विशेषः यस्मिन् तदिति क्रियासम्बन्धविशेषमिति बहुव्रीहिसमासनिष्पन्नेनैव क्रियासम्बन्धविशेषं कारकमिति सूत्रे कृते सति अर्थप्रतिपत्तिर्जायते, अतः बहुव्रीहिसमासेनैव ग्रन्थकारस्यार्थप्रतिपत्तिर्जायते चेत् तत्पुरुषसमासः, ततः कर्मधारयसमासः, ततः मत्वर्थीयः इनिप्रत्ययः अकरणीयः इति। अस्य समाधानं तावदुच्यते यत् वामनाचार्यस्य एतन्मतं नव्यवैयाकरणैः अस्वीक्रियते। भगवतः पतञ्जलेः महाभाष्ये एव नियमस्यास्य विरुद्धाचरणं दृश्यते। अतः ग्रन्थकारः श्रीजीवः नव्यवैयाकरणानां मार्गमनुसृत्यैव बहुव्रीहिसमासं परित्यज्य कर्मधारयोत्तरं मत्वर्थीयप्रत्ययं कृतवान्निति। "कारकमि"त्यपि प्रथमान्तं पदम्। क्रियासम्बन्धविशेषरूपं यत् तत् कारकमिति सूत्रस्य सरलार्थः। क्रियासम्बन्धविशेषि कारकम् इति सूत्रात्मके कारकस्य लक्षणे विशेषपदाभावे क्रियासम्बन्धः कारकम् इत्यनेनैव कारकपदज्ञाने सम्भवे विशेषपदस्य किं प्रयोजनश्चेदुच्यते देवदत्तस्य पुत्रः घटं करोति इति वाक्ये घटकरणात्मकक्रियायां यथा देवदत्तस्य पुत्रस्य सम्बन्धः अस्ति तद्वद् देवदत्तस्यापि साक्षात्सम्बन्धः नास्ति किन्तु परम्परासम्बन्धस्तु विद्यते एव, अतः सम्बन्धादिषु पदेष्वपि कारकत्वारोपः जायेत अर्थादकारकेषु यथा कारकत्वलक्षणं न गच्छेत्तदर्थं ग्रन्थकारेण सूत्रात्मके लक्षणे विशेष इति पदं प्रदत्तम्। एनमेवार्थं प्रतिपादयन् ग्रन्थकारः सूत्रस्य वृत्तौ लिखति – "क्रिया सत्तादिलक्षणो धात्वर्थः, तस्याः जन्यजनकान्तर्भूतक्रियायाः कर्त्तृत्वादिसम्बन्धविशेषो यत्र विवक्ष्यते तत् कारकमुच्यते। यथा वैष्णवो भवति। अत्र सत्ता क्रिया सम्बन्धविशेषी वैष्णवः कारकम्" इति।

**६.२ कारकसंज्ञाविमर्शः—**

क्रियायाः सम्बन्धः स एव विशेषः विद्यते यस्मिन् तदिति क्रियासम्बन्धविशेषि, क्रियासम्बन्धविशेषि यत् तत् कारकमिति। कश्चायं क्रियाविशेषसम्बन्धः इति चेदुच्यते जन्यजनकान्तर्भूतक्रियायाः कर्तृकर्मत्वादिसम्बन्धः। वस्तुतः जन्यजनकान्तर्भूतक्रिया-कर्तृत्वादिसम्बन्धविशेषो यत्र वस्तुनि विवक्ष्यते तत् कारकमुच्यते। नन्विह किं जन्यं को वा जनकः इति चेदुच्यते– वैष्णवो भवतीत्यत्र गुरोः सकाशात् तापपुण्ड्रादिपञ्चसंस्कारग्रहणात्मकं फलं जन्यं, तद्ग्रहणे सत्सङ्गादिनिबन्धनानुकूलप्रवृत्त्युदयरूपो व्यापारो जनकः इति। एतौ जन्यजनकौ

सत्ताक्रियायामेवान्तर्भूताविति। किञ्च तण्डुलं पचतीत्यत्र तण्डुलस्य ओदनरूपेण विक्लेदनरूपं फलं जन्यं, वह्निसन्दीपनादारभ्य अधःसन्तापनादिक्रियाफलात्मको व्यापारो जनकः। एतौ जन्यजनकौ पचनक्रियायामेव अन्तर्भूतौ स्तः इति। एवमन्यत्र कारकेष्वपि ज्ञेयम्।

"क्रियान्वयि कारकम्", "करोति क्रियां निवर्तयतीति कारकम्", "क्रियाभिरन्वितं कारकमि"त्यादीनि कानिचनवाक्यानि सन्ति पाणिनीयव्याकरणशास्त्रेषु कारकपदस्यार्थज्ञानाय, परन्तु एतादृशं सूत्रं नोपलभ्यते, अस्मिन् श्रीहरिनामामृतव्याकरणे कारकपदज्ञानाय ग्रन्थकृता क्रियासम्बन्धविशेषि कारकम् इति सूत्रं प्रणीतम्। अर्थादेतत् स्पष्टं वर्तते यत् ग्रन्थकारः श्रीजीवः व्याकरणपाठकानां व्याकरणविविदिषूणाञ्च कृते सम्यग्रूपेण स्पष्टरूपेण च यथा कारकपदज्ञानं भवेत्तदर्थं सूत्रमतिरिक्तं व्यरचयदिति। अनेन श्रीहरिनामामृतव्याकरणस्य महत्वं परिलक्ष्यते। इदानीं कारकशब्दस्य भगवद्वाचकत्वमस्ति न वेति विचार्यते। ग्रन्थकारः अस्य कारकप्रकरणस्य प्रारम्भे—

"यः कर्ता कर्मकरणं सम्प्रदानमशेषतः।
अपादानाधिकरणे तत्सम्बन्धो भवेदिह"॥[23]

इति मङ्गलमाचरति। इत्युक्ते यः कारकपदार्थः सम्पूर्णरूपेण कर्तृकर्मकरणसम्प्रदानाधिकरणात्मकः, तस्य च सम्बन्धः अस्मिन् कारकप्रकरणे भवेदिति। अर्थात् यः भगवान् श्रीकृष्णः अशेषतः नानास्वरूपेण विश्वस्य कर्ता कर्म करणं सम्प्रदानमपादानमधिकरणञ्च भवति तस्य सम्बन्धः अस्मिन् संसारे भवतीति। एवं प्रकारेण ग्रन्थकृता मङ्गलाचरणे कारकशब्दस्य भगवद्वाचकत्वं स्पष्टं प्रतिपादितमिति। भगवतः षड्कारकत्वं श्रीमद्भागवते अपि प्रतिपादितमस्ति[24]। बहुभिः श्रूतिवचनैरपि भगवतः कर्तृत्वं[25] कर्मत्वं[26], करणत्वं[27], सम्प्रदानत्वम्[28], अपादानत्वम्[29], अधिकरणत्वञ्च[30] प्रतिपादितमस्ति।

एवं ग्रन्थकारेण सुबोधाय पाणिनीयव्याकरणज्ञानं भगवन्नामस्मरणरूपञ्च यदुद्देश्यं तत्साधितं सम्यक्तयेति।

**७. कर्तृ—**

**७.१ श्रीहरिनामामृतव्याकरणे कर्तृसंज्ञास्वरूपम्—**

अस्मिन् श्रीहरिनामामृतव्याकरणे कारकप्रकरणे "स्वतन्त्रं तत्प्रयोजकञ्च कर्तृ"[31] इति सूत्रं संज्ञाविधायकम्। सूत्रेऽस्मिन् चत्वारि पदानि सन्ति। "स्वतन्त्रं", "तत्प्रयोजकञ्चे"ति प्रथमान्तं पदम्, "चे"ति अव्ययपदम्, "कर्तृ" इत्यपि प्रथमान्तं पदम्। "स्वतन्त्रं, "तत्प्रयोजकमि"ति पदद्वयमिति संज्ञीदलम्, "कर्तृ" इति संज्ञादलम्। यस्य कारकस्य साध्यतया साध्यत्वेनाभिधीयमाना जन्यजनकान्तर्भूतलक्षणा वक्तुमिष्यते तत्स्वतन्त्रमित्युक्ते कर्तृकारकमिति। अस्य स्वतन्त्रस्यापि प्रेरकत्वेन प्रयोजकत्वेन च कर्तृकारकमिष्यते इति। यदुक्तं ग्रन्थकारैः– "यस्यैव व्यापारतया विवक्ष्यते तत् स्वतन्त्रम्, यच्च तस्यापि प्रेरकतया तत् प्रयोजकम्। तत्तच्च कारकं कर्तृसंज्ञं स्यात्"[32]। इति। यथा देवदत्तः द्विचक्रिकया ग्रामं गच्छतीति। इहोदाहरणे देवदत्तस्य

स्वतन्त्रत्वेन द्विचक्रिकायाश्च प्रयोजकत्वेन देवदत्तस्य कर्तृत्वं सिद्धमिति।

**७.२ कर्तृसंज्ञाविमर्शः—**

यस्य कारकस्यैव व्यापारतया जन्यजनकान्तर्भूता क्रिया विवक्ष्यते तत् स्वतन्त्रं, यः स्वतन्त्रः स एव कर्ता इति। न चैवं कर्तुः लक्षणे कृते सति देवदत्तः अश्वेन ग्रामं गच्छतीत्यादौ अश्वस्य कर्तृत्वं वाच्यं क्रियायाः तद्व्यापारत्वादिति। इहाश्वस्य कर्त्राधीनत्वात् क्रियासहायकत्वमेव न तु स्वतन्त्रत्वमिति। स्वातन्त्र्ये सति अश्वः ग्रामं गच्छतीत्येव स्यात्।

प्रयोजकस्य प्रेरकतया नियोगकर्तृत्वेन च कर्तृसंज्ञा भवति। यथा यज्ञदत्तेन देवदत्तः पाचयतीत्यत्र यज्ञदत्तः प्रयोज्यः प्रयोजकश्च देवदत्तः ण्यन्तप्रेरणक्रियायाः प्रेरकतया। न च ण्यन्तप्रेरणक्रियायाः स्वातन्त्र्येणैव कर्तृत्वे सिद्धे प्रयोजककर्तृत्वमनर्थकमिति वाच्यं, तर्हि यशोदया अन्नं पाचयते कृष्णः इत्यत्र पाकक्रियायां कृष्णस्य कर्तृत्वाभावे कर्तृगामीक्रियाफलाभावात् आत्मनेपदमसम्भवमिति। अतः देवदत्तादीनां प्रेरणक्रियायां स्वतन्त्रकर्तृत्वं पचिक्रियायां प्रयोजककर्तृत्वमिति। यद्यपि प्रयोजक इति कथनेनैव प्रयोज्याकर्षणं भवति तथापि स्पष्टार्थं सूत्रे तदिति पदं प्रयुक्तम्।

अस्य कर्तृशब्दस्य भगवन्नामत्वं अस्मिन्नध्याये कारकसंज्ञायाः व्याख्यानावसरे श्रुतिवचनादिभिः स्मृतिवचनादिभिश्चोपस्थापितः इति। तद्यथा भगवता इदं जगत्सृष्टमतः जगत्स्रष्टृत्वाद्भगवान्कर्ता। जगति यद्वा भवति तत्सर्वमपि भगवता कार्यते, किञ्च तत्करणे सः स्वतन्त्रः भवति। तद्वदत्रापि कारके स एव कर्ता यः स्वतन्त्ररूपेण यत्किमपि साधयितुं शक्यः इति। अतः भगवान् श्रीकृष्णः महाविष्णुरूपेण जगत्स्रष्टृत्वात् स्वतन्त्ररूपेण कार्यकर्तृत्वात् यथा कर्ता, तथा कारकरूपेण यः कर्ता सोऽपि स्वतन्त्रकर्ता, इत्येवं प्रकारेण कर्तृशब्दस्य भगवन्नामत्वं श्रीहरिनामामृतव्याकरणे प्रतिपादितमिति।

**८. कृष्णपुरुषः—**

**८.१ श्रीश्रीहरिनामामृतव्याकरणे कृष्णपुरुषसंज्ञास्वरूपम्—**

श्रीश्रीहरिनामामृतव्याकरणे पञ्चमे अध्याये समासप्रकरणे आदौ कृष्णपुरुषसमासं विहितवान् 'पीताम्बरात् प्राक् समासाः कृष्णपुरुषसंज्ञाः'[33] इत्यनेन सूत्रेण। अस्मिन् संज्ञाविधायकसूत्रे चत्वारि पदानि सन्ति। 'पीताम्बरादि'ति पञ्चम्यन्तं, 'प्रागि'त्यव्ययवपदं, समासाः 'कृष्णपुरुषसंज्ञाः' 'चे'ति पदद्वयं प्रथमान्तमिति। सूत्रे 'पीताम्बरादि'त्युक्ते बहुव्रीहिसमासादिति। 'प्रागि'त्युक्ते पूर्ववर्तिनः इति। प्रस्तुतसूत्रम् अधिकारसूत्रमपि। एवञ्च सूत्रस्यार्थः भवति – इतः आरभ्य बहुव्रीहिसमासात् पूर्वं यावत् यानि संज्ञाविधायकानि सूत्राणि आलोच्यन्ते तानि सर्वाणि कृष्णपुरुषसंज्ञाविधायकानीत्यर्थात् तत्पुरुषसंज्ञाविधायकानीति। अयञ्च कृष्णपुरुषसमासः उत्तरपदप्रधानः इति।

**८.२ कृष्णपुरुषसंज्ञाविमर्शः—**

कृष्ण एव पुरुषः कृष्णपुरुषः इति मयूरव्यंसकादयश्च[34] इत्यनेन अविहितलक्षण-

तत्पुरुषसमासनिष्पन्नेन कृष्णपुरुषशब्देन भगवान् श्रीकृष्णः उच्यते। भगवान् पुरुषोत्तमः अर्थात् भगवान् सर्वोत्कृष्टः, सर्वशक्तिमान्, तथा सर्वज्ञः अस्ति। पुरुषेषु उत्तमः पुरुषोत्तमः अर्थात् सर्वश्रेष्ठपुरुषः, सर्वश्रेष्ठ ईश्वरः इति वा। भगवान् स्वयमेव गीतायाम् आत्मानं पुरुषोत्तमः इत्युक्तवान्[35]। भगवतः लीलाभिः गुणैश्च सः पुरुषोत्तमः इति वक्तुं शक्यते। तद्यथा– गोवर्धनधारणं, कालियमर्दनं, पूतनावधश्चेति प्रभृतिभिः बाललीलाभिः, मथुरायां कंसवधेनेति युवालीलया च भगवतः पुरुषोत्तमत्वं प्रमाणीयते। किञ्च द्वारकायां श्रीकृष्णः उत्तमराजारूपेण तथा धर्मपालकरूपेण प्रसिद्धः अस्ति। महाभारतस्य युद्धे अर्जुनं प्रति श्रीमद्भगवद्गीतायाः उपदेशः तस्य सर्वज्ञत्वं सर्वशक्तिमत्त्वञ्च प्रकटयति। भगवान् सर्वव्यापकः अस्ति, यत्र यत्र भक्ताः तं स्मरन्ति तत्र तत्र सः प्रकटितः भवति। भगवतः इच्छामात्रेणैव सर्वं सम्भवति अतः सः सर्वशक्तिमान्। भगवतः अज्ञानं किमपि नास्त्यतः सर्वज्ञः अस्ति। श्रीमद्भगवद्गीतायां भक्तियोगे अपि भगवान् परमगुरुः इत्युक्तः। यतो हि सः भक्तान् अनुग्रहं करोति, तेषां दुःखान् च निवारयति[36]। अतः सः सर्वैः पूज्यः, सर्वैः वन्द्यः, सर्वेषाञ्च प्रियः पुरुषोत्तमः अस्ति।

भगवान् सृष्टिकर्ता सर्वभूतानां पालनकर्ता चोच्यते। गीतायां श्रीकृष्णः आत्मानं सर्वस्य मूलं, भगवतः एव सर्वं प्रवर्तते इत्युक्तवान्[37], एकादशाध्याये विश्वरूपदर्शने अपि सर्वेषां सृष्टिकर्तृत्वमुक्तम्। दैत्यव्याकुलं लोकं युगे युगे रक्षां कृतवान्नित्येवं श्रीमद्भागवते अपि भगवतः पालनकर्तृत्वमुक्तम्[38]। अर्थात् भगवान् सर्वेषां स्रष्टा, पालकः, संहारकश्चास्ति। एवं भगवान् श्रीकृष्णः सर्वभूतानां हृदयेषु सन्निहितः, सर्वान्नुत्पादयति, पालनं तथा संहारञ्च करोत्यतः सः परमेश्वरः, सर्वशक्तिमान्, सर्वज्ञः सर्वैः पूज्यः इति।

भगवान् आदर्शः भक्तिमान् पुरुषः इत्युच्यते भक्तानामनुग्रहकारणात्, प्रेमवर्षणात्, कृपावर्षणाच्चेति। तस्योपदेशाः भक्तानां मार्गदर्शने आदर्शाः। अनन्यभावेन ये च भक्ताः तमुपासन्ते सः तेषां भक्तानां योगक्षेमं वहतीति[39]। ये च भक्ताः अत्यन्तभावेन तं भगवन्तमुपासन्ते भगवान् तेषां सर्वपापं हरतीति[40]। किञ्च महाभारते द्रौपदीवस्त्रहरणकाले अपि भगवतः द्रौपदीं प्रत्यनुग्रहः दृश्यते। अत एव भगवान् आदर्शः भक्तिमान् पुरुषः, सखा, संरक्षकः चेति कारणात् सर्वैः पूज्यः।

भगवान् धर्मसंस्थापकः अधर्मस्य नाशकश्चेति। भगवान् धर्मस्य पुनरुद्धारणं, पालनम्, अधर्मनिवारणञ्च करोति। तस्य जीवनम्, उपदेशाः, कृत्याश्च धर्मस्य संस्थापनं सूचयति। यदा यदा जगति धर्मस्य नाशः अधर्मस्य वृद्धिर्भवति तदा तदा भगवान् आत्मानम् अवतारयति[41]। एवं पूतनाबधेन, गोवर्धनधारणेन, कंसवधेन च भगवतः धर्मसंस्थापकत्वं प्रतिष्ठितमेव। एवं प्रकारेण श्रीकृष्णस्य जीवने, उपदेशे, कृत्येषु च धर्मस्य संस्थापनम्, अधर्मस्य नाशनञ्च स्पष्टं दृश्यते। अतः सः धर्मसंस्थापकः, परमगुरुः सर्वैश्च पूज्यः इति।

एवं भगवतः पुरुषोत्तमत्वात्, सृष्टिकर्तृत्वात्, पालनकर्तृत्वात्, आदर्शभक्तिमान्-पुरुषत्वात्, धर्मसंस्थापकत्वाच्च किञ्च भक्तानां प्रियोपास्यत्वात् सः भगवान् श्रीकृष्णः कृष्णपुरुषः इति वक्तुं

शक्यते। अतः तत्पुरुषसमासनिष्पन्नेन भगवद्वाचकेन कृष्णपुरुषशब्देन तत्पुरुषसमासस्य एवं नामकरणं सार्थकमस्ति।

**९. रामकृष्णः—**

**९.१ श्रीश्रीहरिनामामृतव्याकरणे रामकृष्णसंज्ञास्वरूपम्—**

श्रीश्रीहरिनामामृतव्याकरणे पञ्चमं संज्ञाविधायकं सूत्रम्' इतरेतरयोगसमाहारयोः रामकृष्णः'[42] इति। प्रस्तुतसूत्रेण रामकृष्णसंज्ञा विधीयते। अस्मिन् सूत्रे द्वे पदे स्तः। इतरेतरयोगश्च समाहारश्च इति तयोः इतरेतरयोगसमाहारयोः इति द्वन्द्वगर्भतत्पुरुषसमास-निष्पन्नमिति पदं षष्ठ्यन्तं, रामकृष्णः इति प्रथमान्तं पदम्। सूत्रे च-शब्दः नास्ति किन्तु इतरेतरयोगसमाहारौ चशब्दस्यैवार्थाविति ग्रन्थकारेण सूत्रस्य वृत्तौ प्रतिपादितम्–" चशब्दस्य समुच्चयान्वाचयेतरेतरयोगसमाहाररूपार्थाश्चत्वारः"। अर्थात् सूत्रे चशब्दाभावे अपि सूत्रोक्तेनार्थद्वयेन चशब्दस्य पाणिनिनोक्ताः चत्वार एवार्थाः ज्ञेयाः, इत्युक्ते समुच्चयाद्यर्थाः चशब्दद्योत्याः। व्याख्यां कुर्वाणः ग्रन्थकारः इतरेतयोगस्य लक्षणमाह– "उद्भूतावयवसंख्यः इतरेतरयोगः"[43] इति। अर्थात् उद्भूता प्रकटीभूता अवयवसंख्या यत्रेति स इतरेतरयोगद्वन्द्वसमासः, इह प्रायः परवल्लिङ्गं भवति। तद्यथा– रामश्च कृष्णश्चेति विग्रहे रामकृष्णः, इह द्वयोरेव बोधः भवति। किञ्च तिरोहितावयवसंख्यः संहतिप्रधानः समाहारः[44] इति। अर्थात् तिरोहिताः अन्तर्हिताः अस्पष्टीभूताः अवयवसंख्या यत्रेति सः समाहारः इति। संहतिः साहित्यं मिलनमिति वा। वस्तुतः उभयसमासे साहित्यरूपः सम्बन्धार्थस्तु विद्यते, किन्तु इतरेतरयोगे विशेष्यं द्रव्यं, साहित्यं विशेषणमर्थाद्गौणम्। समाहारे तु साहित्यमेव प्रधानं, विशेष्यं तु द्रव्यमेवमुभयोः मिथो भेदः। पाणिनेरिव प्रायः समुच्चयस्यार्थः गृहीतः ग्रन्थकारेणार्थात् परस्परनिरपेक्षस्य एकस्मिन्नन्वयः समुच्चयः[45] इति। यथा– रामो भुङ्क्ते कृष्णश्च भुङ्क्ते इति। इतरेतरयोगसमासे साहित्ये अन्वयः भवति, समुच्चये तु प्रत्येकस्मिन्नन्वयो भवतीति। अन्वाचयः अपि समुच्चयवदेव किन्तु समुच्चये यथा प्रत्येकस्मिन्नन्वयो भवति अन्वाचये प्रत्येकान्वियत्वे अपि अन्तिमन्तु अनाग्रहविषयत्वं भवतीति। तद्यथा– वटो! भिक्षामट गाञ्चानयेति। इहोदाहरणे वटोः भिक्षाटनमेव मुख्यं कार्यं, (भिक्षाटनं समाप्य गृहागमनकाले मार्गे हृता गौश्चेद्दृश्यते तर्हि तामप्यानयेति। अर्थात् आनुषङ्गिकतया गवानयने आग्रहः नास्ति इति व्यज्यते।) समुच्चये अन्वाचये तु समस्यमानानां पदानां परस्परमेकार्थीभावविरहान्न समासः इति।

**९.२ रामकृष्णसंज्ञाविमर्शः—**

पाणिनीयतन्त्रे यः द्वन्द्वसमासः स एवात्र रामकृष्णसमासः। श्रीहरिनामामृतव्याकरणे अन्वर्थनाम एतत्। रामश्च कृष्णश्च रामकृष्णौ इति द्वन्द्वसमासः चार्थे द्वन्द्वः[46] इति पाणिनीयसूत्रेण। रामकृष्णपदयोः समासः रामकृष्णसमासः इति षष्ठीतत्पुरुषसमासः। द्वन्द्वसमासस्य उभयपदप्रधानत्वात् द्वयोः देवयोः अत्र प्राधान्यं विद्यते। हरेः अवताररूपेण यथा रामः प्रसिद्धः, तथैव कृष्णोऽपि स्वयं हरिः। न त्वत्र रामश्चासौ कृष्णश्चेति कर्मधारये रामकृष्णः

परमहंसदेवो वाच्यः हरेः प्रसिद्धावतारत्वाभावादिति। अत एवं भगवद्वाचकेन द्वन्द्वसमासनिष्पन्नेन रामकृष्णाविति पदेन द्वन्द्वसमासस्य नामकरणं सार्थकं जातमिति।

**१०. अव्ययीभावः—**

**१०.१ श्रीहरिनामामृतव्याकरणे अव्ययीभावसंज्ञास्वरूपम्—**

श्रीश्रीहरिनामामृतव्याकरणस्य समासप्रकरणे षष्ठसंज्ञात्वेन अव्ययीभावः ग्रन्थकारेण प्रतिपादितः। अव्ययीभावः[47] इत्यनेन सूत्रेण इयं संज्ञा विहिता। प्रस्तुतसूत्रम् अधिकारसूत्रं संज्ञासूत्रञ्चेति। अस्मिन् संज्ञाविधायके सूत्रे एकमेव पदं वर्तते। अनव्ययम् अव्ययं भवतीति 'अभूततद्भावे कृभ्वस्तियोगे सम्पद्यकर्तरि च्विः'[48] इत्यनेन सूत्रेण निष्पन्नः अव्ययीभावः इति पदं प्रथमान्तम्। अव्ययीभावसमासनिष्पन्नस्य शब्दस्य अव्ययत्वं ब्रह्मत्वञ्च[49] भवतीति। अधिकारसूत्रत्वात् सूत्रस्य वृत्तौ न किमपि ग्रन्थकारेण लिखितं किन्तु अव्ययं सप्तम्याद्यर्थेषु नित्यम्[50] इति सूत्रस्य वृत्तौ नामपदेन सह नित्यमव्ययं समस्यते इति प्रदर्शितम्। यथा हरिम् अधिकृत्य इति अधिहरि। कृष्णस्य समीपम् इति उपकृष्णम्।

**१०.२ अव्ययीभावसंज्ञाविमर्शः—**

नास्ति व्ययं यस्य तदिति बहुव्रीहिसमासे अव्ययमिति पदं निष्पद्यते। यस्य चाव्ययमित्यस्य परमब्रह्म इत्यर्थः[51]। न अव्ययमिति नञ्तत्पुरुषसमासे अनव्ययमिति पदं निष्पन्नं भवति। ततः अनव्ययम् अव्ययं भवत्यनेनेति च्वि-प्रत्यये भू-धातोः करणे घञ्-प्रत्यये अव्ययीभावः इति पदं निष्पद्यते। अनया व्युत्पत्त्या अ-परमब्रह्म परमब्रह्म भवतीति अव्ययीभावपदस्यार्थः। भगवतः श्रीकृष्णस्य नारायणस्य वा परमब्रह्मत्वं वराहपुराणे[52] श्रीमद्भगवद्गीतायां[53] चेत्यादिषु प्रतिपादितमस्ति। अनेन अव्ययीभावपदस्य भगवन्नामत्वं तु स्पष्टं ज्ञायते एव।

श्रीजीवगोस्वामिना श्रीहरिनामामृतव्याकरणे अव्ययीभावसमासस्य पाणिनीयव्याकरणवद्-व्ययीभाव इति नाम प्रदत्तमस्ति, यस्य अव्ययीभावपदस्य भगवन्नामत्वमस्त्येव, अतः अव्ययीभावपदस्य भगवन्नामत्वादनेन भगवद्वाचकेन अव्ययीभावपदेन अव्ययीभावसमासस्य अव्ययीभाव इति नामकरणं सार्थकं जातमिति।

**११. उपसंहारः—**

वैष्णवानां ग्रन्थमणिस्वरूपे पाणिनीयव्याकरणं कातन्त्रव्याकरणञ्चानुसृत्य श्रीजीवगोस्वामिविरचिते श्रीहरिनामामृतव्याकरणे पाणिनीयाः याः संज्ञाः सन्ति, तासां संज्ञानां नामानि हरेः नाम्ना परिवर्त्यालोचिताः, येन वैष्णवानां व्याकरणज्ञानपुरःसरमिष्टोपासना भवेत्। ममास्य प्रबन्धस्य मुख्यमुद्देश्यमासीद्यद्हरिनामामृतव्याकरणकर्तुः ग्रन्थरचनायाः यदुद्देश्यमासीत्तद्ग्रन्थकारेण कथं सम्पादितमिति। अत एतत्प्रदर्शनाय श्रीहरिनामामृतव्याकरणे यानि सप्तप्रकरणानि सन्ति, तेभ्यः प्रायः नव संज्ञाः चिताः, ततः तासां चितसंज्ञानामेव सविमर्शात्मकमालोचनमस्मिन् प्रबन्धे प्रस्तुतमिति। आदौ सर्वेश्वरसंज्ञायाः आलोचना विहिता, या च पाणिनीयव्याकरणे अच्प्रत्याहारसंज्ञात्वेन विहितेति। अस्याः संज्ञायाः आलोचनं मया

'श्रीहरिनामामृतव्याकरणे सर्वेश्वरसंज्ञास्वरूपं', 'सर्वेश्वरसंज्ञाविमर्श'श्चेति भागद्वयेन विहितमिति। तत्रादिभागे सर्वेश्वरसंज्ञाविधायकसूत्रस्य पदविश्लेषणपूर्वकं सम्यक्तया व्याख्यानं प्रस्तुतं, ततः द्वितीये च सर्वेश्वरपदस्यार्थः कः, तस्य पदस्य हरिनामत्वमस्ति न वेति विश्लेषणपूर्वकं विचार्य तेन हरिनामवाचकेन पदेन स्वरवर्णानामचां वा सर्वेश्वरसंज्ञाकरणं कियत्साधु इति विषयाः सम्यक्तयालोचिताः। एवं सर्वेश्वरसंज्ञामतिरिच्य इतोऽपि अष्टसंज्ञाः विश्लेषणपूर्वकमालोचिताः। ताः संज्ञाः तावत्– वामनः, नाम, लक्ष्मीः, कारकम्, कर्तृ, कृष्णपुरुषः, रामकृष्णः, अव्ययीभावश्चेति। एतासां सर्वासामपि संज्ञानामादौ श्रीहरिनामामृतव्याकरणस्थितस्वरूपस्य वर्णनं कृतं, ततः हरिनामवाचकत्वमस्ति न वेति प्रतिपाद्य तासां नामकरणं व्याकरणदृष्ट्या कियत्साधुः इति प्रतिपादितमस्मिन् सम्पूर्णे प्रबन्धे। अन्तिमे च परिशीलितग्रन्थानां नामान्यपि प्रदत्तमिति शम्।

## Endnotes

1. श्रीहरि. – नारायणादुद्भूतोऽयं वर्णक्रमः (१।१)
2. श्रीहरिनामामृतव्याकरणे वर्णक्रमः - अ आ इ ई उ ऊ ऋ ॠ ऌ ॡ ए ऐ ओ औ अं अः। क ख ग घ ङ। च छ ज झ ञ। ट ठ ड ढ ण। त थ द ध न। प फ ब भ म। य र ल व श ष स ह क्ष। एते 'वर्णाः', 'अक्षराणि', 'अलः' च।
3. श्रीमद्भागवतम् - १।३।२८
4. श्रीमद्भागवतम् - १०।२५।१८
5. श्रीमद्भगवद्गीता - १०।८
6. अहमात्मा गुडाकेश सर्वभूताशयस्थितः। अहमादिश्च मध्यं च भूतानामन्त एव च।। श्रीमद्भगवद्गीता - १०।२०
7. सर्वेषां स्थावरजङ्गमादीनाम् ईश्वरत्वेन सर्वेश्वरः, इह सर्वेश्वरशब्देन सर्वावतारि- स्वयंभगवान् कृष्णः उच्यते। श्रीहरिनामामृतव्याकरणे बालतोषणीटीकायाम्, पृष्ठासंख्या - ९
8. श्रीहरि. - 'पूर्वो वामनः' (१।५)
9. 'वामयति (वम णिच् ल्युः) अतिक्षुद्रः'। शब्दकल्पद्रुमे.
10. 'ततस्तु वामनं गत्वा सर्वपापप्रमोचनम्'।। महाभारते – ३ । ८४ । १२२
11. 'त्रिविक्रमापेक्षया बलेरध्वगतस्य भगवतः प्रथमतो ह्रस्वविग्रहप्रकटनेनैव वामनत्वं प्रसिद्धम्, इति भगवन्नामता।' बालतोषणीटीकायाम् – पृष्ठासंख्या - १०
12. श्रीहरिनामामृतव्याकरणम्, सूत्रसंख्या - २।१
13. चार्थे द्वन्द्वः - अष्टाध्यायी, सूत्रसंख्या - २।२।२९
14. तदस्यास्त्यस्मिन्निति मतुप् - अष्टाध्यायी, सूत्रसंख्या - ५।२।९४
15. "नाम प्राकाश्यसम्भाव्यक्रोधोपगमकुत्सने" - अमरकोषः, नामशब्दस्य व्याख्यायाम्,
16. "उणाद्यन्तं कृदन्तञ्च तद्धितान्तं समासजम्। शब्दानुकरणञ्चैव नाम पञ्चविधं स्मृतम्"॥ (गोयीचन्द्रः) – विश्वकोषः

17. नामशब्दव्याख्याने, विश्वकोषः(दशमखण्डः), पृष्ठासंख्या, ९
18. श्रीहरिनामामृतव्याकरणम्, सूत्रसंख्या, २।६
19. नामसंज्ञश्चतुर्विधः(२।६), श्रीहरि. सू. वृत्तौ
20. उणादि. सू. ३।१६०
21. श्रीहरि., अमृता टी.
22. श्रीहरि. सूत्रम् - ४।१०
23. श्रीहरि. – पृष्ठम् - ४५७
24. यस्मिन् यतो यर्हि येन च यस्य यस्माद्यस्मै यथा यदुत यस्त्वपरः परो वा। भावः करोति विकरोति पृथक्स्वभावः सञ्चोदितस्तदखिलं भवतः स्वरूपम्॥ ,श्रीमद्भागवतम् - ७।९।२, यत्र येन यतो यस्य यस्मै यद्यद्यथा यदा। स्यादिदं भगवान् साक्षात् प्रधानपुरुषेश्वरः।। श्रीमद्भागवतम्- १०।८५।४
25. स तपस्तप्त्वा इदं सर्वमसृजत। तै. उ. - २।६।१, तत्सृष्ट्वा तदेवानुप्राविशत्। तै. उ. - २।६।१
26. सर्वं खल्विदं ब्रह्म। छा. उ. - ३।१४।१, खं वायुमग्निं सलिलं महीञ्च। श्रीमद्भागवतम् - ११।२।४१
27. जन्माद्यस्य यतः। ब्र. सू. - १।१।२, यतो वा इमानि भूतानि जायन्ते, येन जातानि जीवन्ति। तै. उ. - ३।१।३
28. कायेन वाचा मनसा मनसेन्द्रियैर्वा करोति यद्यद् सकलं परस्मै नारायणायेति समर्पयेत्तत्। श्रीमद्भागवतम् - ११।२।३६, यत्करोषि यदश्नासि यज्जुहोषि ददासि यत् यत्तपस्यसि कौन्तेय तत् कुरुष्वं मदर्पणम्। श्री. भ. गी. - ९।२७
29. विष्टभ्याहमिदं कृत्स्नमेकांशेन स्थितो जगत्। श्री. भ. गी. - १०।४२
30. यत् प्रयन्त्यभिसंविशन्ति तद् विजिज्ञासस्व। तै. उ., भृ. व., प्रथमेऽनुवाके। मयि सर्वमिदं प्रोतं सूत्रे मणिगणा इव। श्री. भ. गी. - ७।७
31. श्रीहरि. – सूत्रम् - ४।१३
32. स्वतन्त्रं तत्प्रयोजकञ्च कर्ता, वृत्तौ
33. श्रीहरि. – सूत्रम् - ६।२।८
34. पा. सू. - २।१।७२
35. यस्मात्क्षरमतीतोऽहमक्षरादपि चोत्तमः। अतोऽस्मि लोके वेदे च प्रथितः पुरुषोत्तमः॥ श्री. भ. गी.- १५।१८
36. अनन्याश्चिन्तयन्तो मां ये जनाः पर्युपासते। तेषां नित्याभियुक्तानां योगक्षेमं वहाम्यहम्॥ श्री. भ. गी. - ९।२२
37. अहं सर्वस्य प्रभवो मत्तः सर्वं प्रवर्तते। इति मत्वा भजन्ते मां बुधा भावसमन्विताः॥ श्री. भ. गी.- १०।८
38. एते चांशकलाः पुंसः कृष्णस्तु भगवान् स्वयम्। इन्द्रारिव्याकुलं लोकं मृडयन्ति युगे युगे॥ श्री. भा.- १।३।२८
39. अनन्याश्चिन्तयन्तो मां ये जनाः पर्युपासते। तेषां नित्याभियुक्तानां योगक्षेमं वहाम्यहम्॥ श्री. भ. गी.- ९।२२

40. नयं सुचः प्रवणम् पश्यते मयि चानुग्रहं योऽसि। तद्वत् कुरु करावपि सर्वपापं हरिष्यति॥ श्री. भा. - १०।९।२०
41. यदा यदा हि धर्मस्य ग्लानिर्भवति भारत। अभ्युत्थानम् अधर्मस्य तदात्मानं सृजाम्यहम्॥ श्री. भ. गी. - ४।७, "परित्राणाय साधूनां विनाशाय च दुष्कृताम्। धर्मसंस्थापनार्थाय सम्भवामि युगे युगे॥ श्री. भ. गी. - ४।८
42. श्रीहरि. – सूत्रम्. - ११७
43. श्रीहरि. – पृष्ठम् - ९७८
44. श्रीहरि. – पृष्ठम् - ९७८
45. श्रीहरि. – पृष्ठम् - ९७९
46. पा. सूत्रम्.- २।२।२९
47. श्रीहरि. सूत्रम्, - ६।२
48. पा. सूत्रम्.- ५।४।५०
49. श्रीहरि. – सूत्रम्.- ६।३
50. श्रीहरि. – सूत्रम्.- ६।४
51. सदृशं त्रिषु लिङ्गेषु सर्वासु च विभक्तिषु। वचनेषु च सर्वेषु यन्न व्येति तदव्ययमिति। प्रणवोपनिषत्
52. यदेतत् परमं ब्रह्म वेदवादेषु पठ्यते। स देवः पुण्डरीकाक्षः स्वयं नारायणः परः।।, स यज्ञैर्विविधैरिष्टैर्दानैर्दत्तैश्च सत्तम। प्राप्यते परमो देवः स्वयं नारायणो हरिः।। वराहपुराणम्. - १९।१३
53. अहमात्मा गुडाकेश सर्वभूताशयस्थितः। अहमादिश्च मध्यं च भूतानामन्त एव च।। श्री. भ. गी. - १०।२०

## Bibliography


- Gosvāmī, Jīva. Hari-nāmāmṛta-vyākaraṇam. Translated by Matsya Avatāra Dāsa, edited by Gaurapāda Dāsa, Vrindavan, Uttar Pradesh, Rasbihari Lal & Sons, 2016.
- गोस्वामी श्रीजीवः. *श्रीहरिनामामृतव्याकरणम्.* सम्पा. श्रीमत्पुरिदासः, मयमनसिंहः, श्रीशाचीनाथरायचतुर्धुरी
- गोस्वामी श्रीजीवः. *श्रीहरिनामामृतव्याकरणम्.* सम्पा. श्रीहरिदासशास्त्री, श्रीहरिदासनिवासः, कालीदहम्, वृन्दावनम्, श्रीगदाधरगौरहरिप्रेसः, १९८५.
- गोस्वामी श्रीजीवः. श्रीभक्तिरसामृतशेषः. सम्पा. श्रीहरिदासशास्त्री, कालीदहम्, वृन्दावनम्, श्रीगदाधरगौरहरिप्रेस्, १९८३.
- गोस्वामी श्रीजीवः. *श्रीहरिनामामृतव्याकरणम् (खण्डद्वयात्मकम्).* सम्पा. श्रीकृष्णदासमहाराजः, देहली, डालमिया जैन ट्रस्ट, २०३१(संवत्).
- गोस्वामी श्रीजीवः. *श्रीहरिनामामृतव्याकरणम् (बालतोषणीटीकोपेतम्).* सम्पा. हरिपार्षददासः, कलिकाता, सङ्गणकसंस्करणम्, २०१६.
- गोस्वामी श्रीजीवः. *श्रीहरिनामामृतव्याकरणम्.* सम्पा. श्रीमत्पुरिदासगोस्वामी, वाराणसी, १९४७.

- गोस्वामी श्रीलजीवः. *श्रीहरिनामामृतव्याकरणम्.* सम्पा. श्रीमद्भक्तिविलासतीर्थगोस्वामी, कलिकाता, श्रीचैतन्य रिसर्च इनष्टिट्युट्, १९७२.
- च्याटार्जी क्षितीशचन्द्रः. *टेक्निकाल टार्मस् एण्ड टेक्निक् अफ् संस्कृत ग्रामर्.* कलिकता, संस्कृत पुस्तक भण्डार, २००३.
- तर्कवाचस्पतिः तारानाथः . *वाचस्पत्यम्.* वाराणसी, चौखम्बा संस्कृत सीरीज आफिस, १९६२.
- दीक्षितः भट्टोजी. *वैयाकरणसिद्धान्तकौमुदी (प्रथमभागः).* सम्पा. गिरिधरशर्मा, परमेश्वरानन्दशर्मा, प्रथमसंस्करणम्, वाराणसी, मोतिलाल वनारसी दास, २०१०.
- दीक्षितः भट्टोजी. *सिद्धान्तकौमुदी (*भागद्वयात्मिका, द्वितीयसंस्करणम्). सम्पा. श्रीशाचन्द्र वसुः, देहली, मोतिलाल वनारसीदासः, १९६२.
- महर्षिवेदव्यासः. *श्रीमद्भगवद्गीता (शाङ्करभाष्यहिन्दी-अनुवादसहिता).* सम्पा. श्रीहरिकृष्णदासगोयेन्दका, गोरखपुरम्, गीताप्रेसः, २०४६ (संवत्).
- महर्षिवेदव्यासः. *श्रीमद्भागवतमहापुराणम्.* गोरखपुरम्, गीताप्रेसः, २०४८ (संवत्).
- महर्षिवेदव्यासः. *श्रीविष्णुपुराणम् (खण्डद्वयात्मकम्).* सम्पा. श्रीरामः, बरेली (उत्तरप्रदेशः), संस्कृतिसंस्थानम्, १९८२.
- मिश्रः नारायणः. *अष्टाध्यायीसूत्रपाठः.* वाराणसी, चौखम्बा ओरियेण्टालिया, १९७७.
- मिश्रः रामशङ्करः. *अष्टाध्यायीसूत्रपाठः.* वाराणसी, मोतिलालबनारसीदासः, १९९७.
- मीमांसकः युधिष्ठिरः. *संस्कृत व्याकरण शास्त्र का इतिहास* (प्रथमभागः, द्वितीयभागः, तृतीयभागश्च). २०२०.
- राधाकान्तदेवः. *शब्दकल्पद्रुमः.* सम्पा. वरदाप्रसादवसुः, हरिचरणवसुः, वाराणसी, चौखम्बा संस्कृत सीरीज आफिस, १९६७.
- वामनः, जयादित्यः. *काशिका* (भागद्वयात्मिका). सम्पा. आर्येन्द्रशर्मा, प्रथमसंस्करणम्, १९६९
- वेदव्यासः. *महाभारतम्.* सम्पा. रामनारायणदत्तपाण्डेयः, गोरखपुरम्, गीताप्रेस, २००८.
- वेदव्यासः. *वराहपुराणम्.* सम्पा. पञ्चाननतर्करत्नः, कलिकाता, नवभारत पब्लिशर्स, १९९४.
- वेदव्यासः. *श्रीमद्भागवतम्.* सम्पा. राधाविनोदगोस्वामी, कलिकाता, गिरिजा लाइब्रेरी, २००६.
- सिंहः अमरः. *अमरकोषः (सुधारामाश्रमीटीकाद्वयोपेतः).* सम्पा. वासुदेवपणशीकरः, देहली, चौखम्बा संस्कृत प्रतिष्ठान, २०१७.
- हालदार श्रीगुरुपद. *व्याकरण दर्शनेर इतिहास* (प्रथमखण्डः, द्वितीयखण्डः). कलिकाता, श्रीभारतीविकाशहालदार, १३५०(बङ्गाब्दः).


———